✧˖°*❋ ❋*°˖✧

# શ્રી પંચાયુધ સ્તોત્રમ્

# Sri Panchayudha Stotram of Shriman Narayan

in **gujarati**

✧˖°*❋ ❋*°˖✧

# ॥ શ્રી પંચાયુધ સ્તોત્રમ્ ॥

સ્ફુરત્સહસ્રારશિખાતિતીવ્રં
સુદર્શનં ભાસ્કરકોટિતુલ્યમ્ ।
સુરદ્વિષાં પ્રાણવિનાશિ વિષ્ણોઃ
ચક્રં સદાઽહં શરણં પ્રપદ્યે ॥ 1 ॥

વિષ્ણોર્મુખોત્થાનિલપૂરિતસ્ય
યસ્ય ધ્વનિર્દાનવદર્પહંતા ।
તં પાંચજન્યં શશિકોટિશુભ્રં
શંખં સદાઽહં શરણં પ્રપદ્યે ॥ 2 ॥

હિરણ્મયીં મેરુસમાનસારાં
કૌમોદકીં દૈત્યકુલૈકહંત્રીમ્ ।
વૈકુંઠવામાગ્રકરાગ્રમૃષ્ટાં
ગદાં સદાઽહં શરણં પ્રપદ્યે ॥ 3 ॥

યજ્જ્યાનિનાદશ્રવણાત્સુરાણાં
ચેતાંસિ નિર્મુક્તભયાનિ સદ્યઃ ।
ભવંતિ દૈત્યાશનિબાણવર્ષૈઃ
શારંગં સદાઽહં શરણં પ્રપદ્યે ॥ 4 ॥

રક્ષોઽસુરાણાં કઠિનોગ્રકંઠ-
-ચ્છેદક્ષરત્ક્ષોણિત દિગ્ધસારમ્ ।
તં નંદકં નામ હરેઃ પ્રદીપ્તં
ખડ્ગં સદાઽહં શરણં પ્રપદ્યે ॥ 5 ॥

ઇમં હરેઃ પંચમહાયુધાનાં
સ્તવં પઠેદ્યોઽનુદિનં પ્રભાતે ।
સમસ્ત દુઃખાનિ ભયાનિ સદ્યઃ
પાપાનિ નશ્યંતિ સુખાનિ સંતિ ॥ 6 ॥

વને રણે શત્રુ જલાગ્નિમધ્યે
યદૃચ્છયાપત્સુ મહાભયેષુ ।
પઠેત્વિદં સ્તોત્રમનાકુલાત્મા
સુખીભવેત્તત્કૃત સર્વરક્ષઃ ॥ 7 ॥

યચ્ચક્રશંખં ગદખડ્ગશારંગિણં
પીતાંબરં કૌસ્તુભવત્સલાંછિતમ્ ।
શ્રિયાસમેતોજ્જ્વલશોભિતાંગં
વિષ્ણું સદાઽહં શરણં પ્રપદ્યે ॥

જલે રક્ષતુ વારાહઃ સ્થલે રક્ષતુ વામનઃ ।
અટવ્યાં નારસિંહશ્ચ સર્વતઃ પાતુ કેશવઃ ॥

**ઇતિ પંચાયુધ સ્તોત્રમ્ ॥**

✧˳·˖✶°*❋ ❋*°✶˖·˳✧

Free download PDF of all types of mantra, stotram,vandana,arati: chalisapdf.net